पाणिनिनये एकश्रुतिकल्पना

Dr. E.N. Narayanan

उच्चैरुदात्तः, नीचैरनुदात्तः, समाहारः स्वरितः इति त्रयः स्वराः विहिताः। एते च उदात्तादिशब्दाः स्वरे अर्थात् वर्णधर्मे लोकवेदयोः प्रसिद्धाः। ते अचि पारिभाषिकाः भवन्ति। तत्र उदात्तानुदात्तस्वरसमाहारः स्वरितः। तत्र कस्मिन्नंशे उदात्तः कस्मिन्नंशे अनुदात्तः कियान् वा उदात्तः कियान् वा अनुदात्तः इति शङ्कासङ्गतौ तस्यादित उदात्तमर्धहस्वम् इति सूत्रेण समाधीयते। अर्धहस्वम् इति अर्धमात्रा उपलक्ष्यते। स्वरितस्य आदौ अर्धहस्वम् उदात्तम्, परिशिष्टमनुदात्तम्। तस्य अनुदात्तस्य उदात्तपरकत्वे स्वरितपरकत्वे श्रवणं स्पष्टं भवति। प्रातिशाख्ये-

अनुदात्तः परः शेषः स उदात्तश्रुतिर्न चेत्।
उदात्तं वोच्यते किञ्चित् स्वरितं वाक्षरं परम्।।

(ऋ. प्रा-३.५) बालमनोरमा, तस्यादित उदात्तमर्धहस्वम् इति सूत्रे) इति उदात्तश्रुतिः प्रसिद्धा। यथा अग्निमीले इत्यत्र। तत्र ईळे इत्यत्र अग्निशब्दात् (अन्तोदात्त-फिषोऽन्त उदात्त) उदात्तादनुदात्तस्य स्वरित इति ईकारस्य स्वरितत्वे स्वरितात्संहितायामनुदात्तानामिति एकारस्य प्रचयत्वे, प्रचयपरत्वे उदात्तस्वरितपरत्वाभावात् अनेन प्रातिशाख्यवचनेन उदात्ततरत्वात्मिका उदात्तश्रुतिः भवति। तत्तद्विधिप्रदेशेषु आद्युदात्तश्च, अनुदात्तौ सुप्पितौ, तित्स्वरितम् इत्यादिषु उदात्तादिसंज्ञा प्रयोजनम्। एवमुदात्तादीनां व्यवस्था।

तत्र एकश्रुत्यापि स्वरव्यवहारः क्रियते। का नाम एकश्रुतिः

एका श्रुतिः यस्य तदिदमिति एकश्रुतिः। एकश्रुति वाक्यं भवति।

(काशिका भाग१, पु-२७५)

उदातादीनां स्वराणाम् अविभागेन अवस्थानम् एकश्रुतिः।

(सिद्धान्तकौमुदी सबोधिनी पु-४६८)

स्वराणाम् अविभागेन अवस्थानम् एकश्रुतिः। यद्वा उदात्तादिभ्यो भिन्नः स्वरः एकश्रुतिः। आद्ये उच्चनीचसमुदितं स्थानम्, परन्तु भेदेनानुपलब्धिरिति स्वरिताद् भेदः। अन्त्ये तु तयोर्मध्यमेकश्रुतेः स्थानम्।

(सिद्धान्तकौमुदी शेखरव्याख्या, पु-४६८)

प्रचय इति नाम्नापि व्यवहारः एकश्रुतेः वर्तते।

अष्टाध्याय्याम् एकश्रुतिविधायकानि सूत्राणि सन्ति, तन्निषेधवचनानि च। मुनित्रयोक्त्या तत्सिद्धान्तापग्रथनात्मककौस्तुभ-काशिका-कौमुदी-शेखरादीनां चिन्तासरण्या च पाणिनिनये एकश्रुति कल्पना केति अत्र विचारविषयः।

१. एकश्रुति दूरात्संबुद्धौ(१.२.३३)

कौमुदीमतानुसारेण *दूरात्संबोधने वाक्यमेकश्रुतिः स्यादिति* सूत्रार्थः। सिद्धान्तकौमुदी (भाग४,पु-४६८) *त्रैस्वर्ये पदानां प्राप्ते दूरात् सबुद्धौ एकश्रुत्यं विधीयते* इति काशिका (काशिका, प्रथमो भागः, पु-२७५)। तत्र त्रैस्वर्यं नाम त्रयः स्वरास्त्रैस्वर्यमिति स्वार्थे ष्यञ् इति प्रदीपकारः। भावे ष्यञ् इति उद्योतकारः। *त्रैस्वर्येणाधीमहे* (समाहारः स्वरितः, महाभाष्यम्(२)) इति महाभाष्यवाक्यव्याख्यानावसरे त्रैस्वर्यपदनिरुक्तिः प्रदीपोद्योतयोः दृश्यते।

सर्वथापि उदात्तानुदात्तस्वरिताः गृह्यन्ते। अत्र सूत्रे सबोधनं संबुद्धिरिति सर्वेषामभिप्रायः। अत्र भाष्यप्रामाण्यं यथा-

यदि पारिभाषिक्याः संबुद्धेर्ग्रहणं देवाः ब्राह्मणाः इत्यत्र न प्राप्नोति। अथान्वर्थग्रहणं,न दोषो भवति।

(महाभाष्यम्, द्वितीयोभागः, इदं सूत्रम् द्रष्टव्यम्)

तदिदं व्याचष्टे सिद्धान्तकौमुदीसुबोधिन्याम्-

संबोधनं संबुद्धिरित्यनेन अन्वर्थस्य संबुद्धिशब्दस्य ग्रहणम्। न एकवचनं संबुद्धिरिति पारिभाषिकस्य। सति तु ग्रहणे आगच्छत देवब्राह्मणा इत्यत्र न स्यात्। अन्वर्थग्रहणं च दूरादित्यनेन संबन्धाल्लभ्यते। नह्यामन्त्रितविभक्तेः दूरत्वमदूरत्वञ्च संभवति। संबोधनस्य तु क्रियारूपत्वात् अपादानत्वात् दूरादिति विशेषणसंभवः। दूरत्वं न देशस्वरूपमाश्रीयते। अनवस्थितत्वात्। किं तर्हि संबोधनक्रियापेक्षया

दूरत्वं यावति देशे प्रकृतिप्रयत्नोच्चारितं संबोध्यमानेन न श्रूयते किन्त्वधिकं प्रयत्नम् ते तत् संबुद्धौ दूरं भवति।

(सिद्धान्तकौमुदी भाग ४,पु-४६८)

आगच्छ भो माणवक देवदत्त इति उदाहरणम्। अत्र दूरात् संबोधने वाक्यम् एकश्रुति भवति। किन्तु दूराद्धूते च, वाक्यस्य टेः प्लुत उदात्त इति देवदत्त३ इत्यस्य प्लुतस्य उदात्तत्वम् एकश्रुत्यं बाधित्वा सिध्यति। दूरात् संबोधनाभावे त्रैस्वर्यमेव वर्तते। तथा हि आगच्छ इत्यत्र आङ् निपाता आद्युदात्ताः उपसर्गाश्चाभिवर्जम् इति फिट्सूत्रेण उदात्तः। गच्छ इति तिङन्तं तिङ्ङतिङः इति निघातः। भोशब्दो, निपाता आद्युदात्ता इति, आद्युदात्तः। शेषस्य, आमन्त्रितस्य च इति सूत्रेण, पदात् परस्य अपादादिस्थितस्य आमन्त्रितस्य सर्वस्य अनुदात्तः इति वाक्ये दूरात् संबोधनाभावे त्रैस्वर्येण स्थितिः।

एकश्रुतिस्वरूपवर्णनम्

अत्र भाष्ये एकश्रुतिस्वरूपं निरूप्यते। तत्र पक्षद्वयं विद्यते।

तत्र प्रथमपक्षे इयमेकश्रुतिः नोदात्तस्वरूपा नाप्यनुदात्तस्वरूपा। यदि उदात्तस्वरूपा चेत् यज्ञकर्मण्यजपन्यङ्खसामसु इति सूत्रेण यज्ञकर्मणि वौषट्शब्दस्य उदात्तश्रुतिः सिध्येत्। उच्चैस्तरां वा वषट्कारः इति विकल्पेन उदात्तश्रुतिः, एकश्रुतिः च विधीयेते इति व्यर्थम्। वैय्यर्थ्येन ज्ञापयति एकश्रुतिरुदात्ता न इति तथोक्तं भाष्ये-

नोदात्ता। यदयं उच्चैस्तरां वा वषट्कारः इत्याह। अतन्त्रं तरनिर्देशः। यावदुच्चैस्तावद् उच्चैस्तराम्।

(महाभाष्यम्,भाग२, इदं सूत्रं द्रष्टव्यम्)

इति । एवम् अनुदात्तस्वरूपा चेत् उदात्तस्वरितपरस्य सन्नतर इति तरनिर्देशः व्यर्थः। यदि एकश्रुतिः अनुदात्ता चेत् एकश्रुत्यनुवृत्त्यैव अनुदात्ततरस्य सिद्धत्वात् उदात्तस्वरितपरस्य अनुदात्तस्य सन्नतरविधानं व्यर्थम्। वैय्यर्थ्येन ज्ञापयति इयमेकश्रुतिः नानुदात्ता। तदिदमुच्यते भाष्ये-

अनुदात्ता च न। यदयं उदात्तस्वरितपरस्य सन्नतरः इत्याह। अतन्त्रं तरनिर्देशः. यावत् सन्नः तावत् सन्नतरः।

(महाभाष्यम्,भाग२, इदं सूत्रं द्रष्टव्यम्)

इति। तर्हि किमिदमेकश्रुतिस्वरूपमिति चेदुच्यते भाष्ये प्रदीपे च-

सैषा ज्ञापकाभ्यामुदात्तानुदात्तयोर्मध्यम् एकश्रुतिरन्तरालं ह्रियते।

(महाभाष्यम्,भाग२, इदं सूत्रं द्रष्टव्यम्)

प्रदीपः- *सन्नतर इति एकश्रुत्यनुवृत्त्यैव सिद्धत्वात् सन्नतरविधानमनर्थकं स्यात्। क्षीरोदकवत् उदात्तानुदात्तयोः भेदतिरोधानमेकश्रुतिरित्यर्थः। स्वरिते तु विभागेन तयोरुपलब्धिः। स्वरिते विभागेन तयोरुपलब्धिः।*

(महाभाष्यम्,भाग२, प्रदीपः, इदं सूत्रं द्रष्टव्यम्)

अथ द्वितीयः पक्षः उच्यते। अयञ्च भाष्यप्रदीपोद्योतेषु स्पष्टतरं निर्दिष्टत्वात् साक्षात् विलिख्यते-

महाभाष्यम्- *एकश्रुतिः उदात्ता-उच्चैस्तरां वा वषट्कार इत्यत्र तन्त्रं तरनिर्देशः। उच्चैर्दृष्ट्वा उच्चैस्तराम् इत्येतद्भवति।*

प्रदीपः- *सोमस्याग्रे व्रीही वौषट् इत्यत्र मन्त्रे यज्ञकर्मणि इत्यनेन एकश्रुतिर्विहिता तदपेक्षया वौषट्शब्दस्य उदात्ततरत्वं विधीयते। सति चैकश्रुतेरुदात्तानुरागे तदपेक्षः प्रकर्षो युज्यते। यथा मलिने वस्त्रे शौक्ल्यानुबन्धसद्भावात् तदपेक्षो वस्त्रान्तरेषु शुक्लतरव्यपदेशः इत्यर्थः।*

उद्योतः- *सति च- वौषट्व्यतिरिक्तमन्त्रभागस्य उदात्तत्वे सत्येव तदपेक्षप्रकर्ष-प्रत्ययोपपत्तिरिति भावः। अत्रापि पक्षे भेदतिरोधानमेव स्वरिताद् विशेषः तेनैव उभयरूपता चेति बोध्यम्। एवञ्च सन्नतरः एकश्रुतिविषय एवेति बोध्यम्।*

महाभाष्यम्- *एकश्रुतिः अनुदात्ता- उदात्तस्वरितपरस्य सन्नतरः इत्यत्र तन्त्रं तरनिर्देशः। सन्नं दृष्ट्वा सन्नतर इत्येतद्भवति।*

(महाभाष्यम्,भाग२, इदं सूत्रं द्रष्टव्यम्)

एवमस्मिन् पक्षे सप्त स्वराः भवन्ति-उदात्तः, उदात्ततरः, अनुदात्तः, अनुदात्ततरः, स्वरितः, स्वरिते य उदात्तः सोऽन्येन विशिष्टः, एकश्रुतिः सप्तमः। तरनिर्देशः सप्तस्वरपक्षे मानम्।

उद्योतः- *सप्तस्वरमध्ये उदात्ततरानुदात्ततरौ एकश्रुतिगतोदात्ताद्यपेक्षया एव अतिशयविशिष्टौ न तु स्वतन्त्रोदात्ताद्यपेक्षया।*

(महाभाष्यम्,भाग२, इदं सूत्रं द्रष्टव्यम्)

तत्र कौमुदीशेखरकाराः एवं वदन्ति- पक्षद्वयेऽपि उदात्तात् उदात्ततरस्य अनुदात्तात् अनुदात्ततरस्य च श्रवणे न विशेषः, उच्चारणे न यत्नविशेषः। उदात्तादिसप्तस्वरपक्षेऽपि एकश्रुतौ या उदात्तता अनुदात्तता च वर्तते तस्याः अपि विशिष्टः उदात्ततरः अनुदात्ततरश्च इति बोधनार्थम्। उदात्तस्वरितपरस्य सन्नतरः इति अनुदात्तस्य सन्नतरविधानम् एकश्रुतिबाधनार्थम् भवति इति।

एकश्रुतिविधायकानि सूत्रान्तराणि

१. यज्ञकर्मण्यजपन्यूङ्खसामसु।

यज्ञक्रियायां मन्त्र एकश्रुतिः भवेत् जपादीन् वर्जयित्वा। अत्र अजपन्यूङ्खसामसु इति पर्युदासेन जपादीनाञ्च मन्त्रविषयत्वात् मन्त्र इति अत्र स्वीक्रियते। न ऊहादिषु। ऊहिते सत्येव इन्द्रशत्रुर्वर्धस्व इति स्वरदोषात् यजमानं हिंसितवान्। इन्द्रस्य आभिचारः वृत्रेण आरब्धः। तत्रास्मिन् मन्त्रे ऊहिते इन्द्रस्य शत्रुर्भव इति अर्थे प्रतिपाद्यमाने समासस्य इति अन्तोदात्तः प्रयोक्तव्यः, अथवा इन्द्रस्य शत्रुरिति व्यस्तनिर्देशेन तत्पुरुषसमासो वा। इन्द्रः शत्रुः यस्य इति बहुव्रीहिसमासं कृत्वा मन्त्रं प्रयुक्तवान्। अत्र बहुव्रीहौ प्रकृत्या पूर्वपदमिति पूर्वपदप्रकृतिस्वरः संपन्नः। प्रकृतिस्वरस्तु व्युत्पत्तिपक्षे *ऋज्रेन्द्राग्रवज्राविप्रकुब्रचुब्रक्षुरखुरभद्रोग्रभेरभेलशुक्रशुक्लगौरवन्नेरमालाः* (उणादि-१६८) इति रन्नन्तत्वे ञ्नित्यादिर्नित्यम् इति नित्वादाद्युदात्तः। अव्युत्पत्तिपक्षे ग्रामादीनाञ्च इति आद्युदात्तः प्रकृतिस्वरः। अस्य प्रयोगे स्वरापराधेण इन्द्रः वृत्रं हतवानिति। यथा शतपथब्राह्मणे-

अथ यदयमब्रवीत् - इन्द्रशत्रुर्वर्धस्व इति तस्मादु हैनमिन्द्र एव जघान। अथ यद्ध शश्वदवक्ष्यत- इन्द्रस्य शत्रुर्वर्धस्वेति शश्वदुह स इन्द्रमेवाहनिष्यत्। (श.प.ब्रा.१का ५प्र २ब्रा)

इति। अनाम्नातेष्वमन्त्रत्वमिति (पू.मी. २.१.३४) इति ऊह्यमानस्य अमन्त्रत्वात् यज्ञकर्मणि इति मन्त्रपर्युदासेन मन्त्राणामेकश्रुतिर्विधीयमाना अत्र न भवति। सूर्याय त्वा इति लौकिकशब्देन क्रियमाणस्य ऊह्यमानत्वम्। इदञ्च दुष्टः शब्दः स्वरतो वर्णतो वा (महाभाष्यम्, भाग१ पु पु -३०-३२) इति पस्पशे प्रदीपोद्योतयोः स्पष्टम्। अतः यज्ञक्रियायां मन्त्र इति पर्युदासेन लभ्यते। तत्रापि संपूर्णोहितस्य मन्त्रस्य ऊहितत्वम्, न तु यत्किञ्चिदूहितपदघटिते मन्त्रत्वं, तन्मध्यपतितन्यायेन इति शेखरकाराः (पु-४६९)। एवञ्च अनेन वेदे त्रैस्वर्येण पठिताः मन्त्राः यज्ञक्रियायां तथा प्रयोगे प्राप्ते एकश्रुतिः विधीयते। यज्ञक्रियायामित्यनेन स्वाध्यायकाले त्रैस्वर्यमेव। उदाहरणम्- अग्निर्मूर्धा दिव ककुत्पतिः पृथिव्या अयम्। *अपां रेतांसि जिन्वतोम्३*

इत्यत्र अग्निः प्रत्ययस्वरेण फिट्स्वरेण वा अन्तोदात्त इत्यादिस्वरप्रक्रिया महती विद्यते, विस्तरभयात् नोपपाद्यते।

यज्ञकर्मणि एकश्रुत्या एवं वेदस्वाध्यायकाले त्रैस्वर्येण च पठनीयम्। जपादिष्वपि एकश्रुतिर्नास्ति। जपो नाम उपांशु प्रयोगः। यथा जले निमग्नस्य। न्यूङ्खा नाम षोडश ओकाराः।

तेषु प्रथमसप्तमत्रयोदशास्त्रय उदात्ताः त्रिमात्राः इतरे त्रयोदश अनुदात्ताः अर्धोकाराः। एतच्चाश्वलायनेन चतुर्थेऽहनि इति खण्डे (ऋ.ब्रा) स्फुटीकृतम्। वृत्तौ तु षडोंकारा इति प्रायिकः पाठः , तत्र षट्त्वे मानत्त्वे च मूलं मृग्यम्।

(शब्दकौस्तुभ, भाग२ पु-१७)

इति कौस्तुभे उच्यते।

गीतिषु सामाख्या। अत्र ममाग्ने वर्चो विहवेष्वस्तु इति मन्त्रो यद्यपि हविरभिमर्शने विनियुक्तः तत्र एकश्रुतिः, आपस्तंबोक्तरीत्या अग्निहोत्रप्रकरणे चतस्रो जपित्वा इति निर्देशात् त्रैस्वर्येऽपि न दोष इति शेखरः। (पु-४६९)।

अस्मिन् सूत्रे शेखरकारः-

जपादिग्रहणं याजमानमन्त्राणामप्युपलक्षणम्। कात्यायनसूत्रस्वरसात्। वस्तुतः कात्यायनप्रातिशाख्ये तानलक्षणमेकं स्वरमाहुर्यज्ञकर्मणि सामजपन्यूङ्खवर्जम् प्रवचनो वा यजुषि इत्युक्तेर्यजुषि त्रैस्वर्यमपि। तत्र प्रवचनशब्देन पाठ उच्यते। तत्र भवो वा स्वरो यजुषि यज्ञकर्मणि त्रैस्वर्यलक्षण इति तद्भाष्यकृतः। यद्यपि तत् सामाख्याबलात् तच्छाखीयानामेव तथापि अविरुद्धत्वात् सर्वशाखां प्रत्येकं कर्मेति न्यायात् च अन्येषामपि त्रैस्वर्यम्, परन्तु प्रागुक्तकल्पसूत्रपाणिनिसूत्रतद्भाष्यादिपर्यालोचनया एकश्रुतौ धर्माधिक्यं बोध्यम्।

(पु-४७०)

इति वदति। तथा च बहूनां मतभेदेन एकश्रुतेः यज्ञकर्मसु वैकल्पिकत्वेन एकश्रुतिकथनात् नित्यत्वेन कथनमेव वरमिति तेषामभिप्रायः प्रतीयते। अत्र तान इति एकश्रुतिः।

२. उच्चैस्तरां वा वषट्कारः (१-२-३५)

यज्ञकर्मणि वषट्कारः उच्चैस्तरां वा एकश्रुतिर्वा स्यात्। *सोमस्याग्ने व्रीही वौश्षट्* इति उदाहरणम्। अत्र सूत्रे वषट्शब्दः वौषट्शब्दं लक्षयति। देवतासंप्रदानस्य द्योतकोऽयं

शब्दः। पाणिनेः सूत्रस्य कृतिर्विचित्रा इति वृत्तिकारः। (भाग१पु-१७१) प्रतिपत्तिलाघवेऽपि मात्रा गौरवात् इति कौस्तुभकारः (भाग-२पु-१७) ब्रूहिप्रैष्यश्रौषड्वौषडावहानामादेः इति आदेः औकारस्य प्लुते तस्य उदात्तस्सिध्यति। तदपेक्षया उदात्ततरः अन्त्यस्य विधीयते। केन द्वयोरपि उदात्ततरः। तदा याज्यान्तः इत्यनेन यज्ञकर्मणि याज्यमन्त्राणामन्त्यस्य टेः प्लुते याज्यान्तापेक्षः प्रकर्ष इति प्रबलपक्षः। अत्र तरपः स्वार्थिकत्वमुक्त्वा प्रथमस्य उदात्तमात्रे द्वितीयस्य अनेन विधीयते इति पक्षः। सर्वस्य उच्चैस्तराम्बलीयान् याज्यायाः इति सूत्रितत्वात् वषट्कारस्य अन्त्यत्वात् याज्यान्तापेक्षप्रकर्षाविवक्षापक्षः प्रबलः इति कौस्तुभकारः। (भाग-२, पु-१७) विकल्पेऽत्र एकश्रुतिरपि भवति।

३. विभाषा च्छन्दसि। (१-२-३६)

छन्दसि विभाषा एकश्रुतिः स्यात्। इयञ्च व्यवस्थितविभाषा। संहितायां त्रैस्वर्यम्, बह्वृचानां ब्राह्मणे एकश्रुतिः, अन्येषामपि यथासंप्रदायं व्यवस्था। यज्ञकर्मणि इत्यस्य निवृत्त्यर्थं पुनः विभाषाग्रहणमिति वृत्तिकाराः. पु-१८०)। तन्न युक्तमिति कौस्तुभे। छन्दसि इत्युक्तेऽपि तन्निवृत्तिसिद्धेः। (पु-१८भाग२) आवृत्या विभाषा अच्छन्दसि इति पदच्छेदेन भाषायामपि पाक्षिकैकश्रुतिः। श्वेतो धावति इति द्व्यर्थं वाक्यमत उपपद्यते। यदि स्वरभेदे श्व इति अन्तोदात्ते इत इति ऊडिदंपदाद्यप्पुम्रैद्युभ्यः इति अन्तोदात्ते, श्वेत इति घृतादित्वात् अन्तोदात्ते श्वेतो धावति इति वाक्ये विरुद्धस्वरतत्पुरुषबहुव्रीह्याश्रयणेन द्व्यर्थप्रतिपादनं न शक्यते। एवमलंबुसानां याता इत्यत्र अलमिति निपातत्वेन आद्युदात्तः, बुसशब्द अन्तोदात्तः अलंबुसशब्दोऽपि। अत्रापि द्व्यर्थप्रतिपादनं न भवेत्। अतः एकश्रुतिः भाषायां स्वीक्रियते। दाण्डिनायनेत्यादिसूत्रे एकश्रुतिः स्वरसर्वनाम इति तत्र भाष्यप्रमाणं भवति। काव्यप्रकाशकृतापि एकश्रुत्या व्यवहारेण वेद इव लोकोऽपि स्वरो न विशेषाध्यवसायहेतुरिति उक्तम्। एवं तर्हि भाषायां कथं स्वरव्यवहारः इति चेत्- झल्युपोत्तमम् (६-१-१८०) इति उपोत्तमस्य उदात्तविधानानन्तरं विभाषा भाषायाम्(६-१-१८१) इति भाषायां विकल्पेन उदात्तविधिना भाषायामपि स्वरविधिरस्तीति कौस्तुभे-पु१८) शेखरे चोच्यते। यथा-

किमर्थं तर्हि झल्युपोत्तममिति प्रक्रम्य विभाषा भाषायामिति सूत्रितमिति चेत्, त्रैस्वर्येण प्रक्रमे पाक्षिकानुदातत्वलाभाय इति गृहाण। एतेन भाषायां स्वरो नास्त्येवेति भ्राम्यन्तः परास्ताः स्वरविधौ छन्दोऽधिकाराभावाच्च -शेखरे(पु-४७२) इति।

पञ्चभिः चकारात्परस्य अनेनोदात्तः। एवञ्च श्लिष्टकाव्यनिर्माणे तत्पुरुषाश्रयणेन बहुव्रीह्याश्रयणेन च एकस्य वाक्यस्य द्व्यर्थप्रतिपादनं सुकरं भवति।

शेखरकारः शाच्छोरन्यतरस्यामिति सूत्रे देवव्रातो गलो ग्राह इत्यादिपरिगणित-व्यवस्थितविभाषासु अनन्तर्भावात् अस्य व्यवस्थितविभाषात्वं नाङ्गीकुर्वन्ति। अत एव कुत्रचित् सर्वैरपि एकश्रुत्या स्वाध्यायकाले पाठः क्रियते। अतः संहितायां त्रैस्वर्यमिति न व्यवस्था। छन्दसि त्रैस्वर्ये धर्माधिक्यम्, लोके तु समता इति सूत्रे छन्दोग्रहणवैय्यर्थ्यमपि नास्ति इति तेषामभिप्रायः।

४. स्वरितात्संहितायामनुदात्तानाम् (१-२-३९)

स्वरितात् परेषामनुदात्तानां संहितायाम् एकश्रुतिः स्यात्। अत्र बहुवचननिर्देशः अविवक्षितः। अत्र भाष्यम्-

नान्तरीयकत्वादत्र बहुवचनेन निर्देश क्रियते। अवश्यं कयाचिद्विभक्त्या केनचिद्वचनेन निर्देश कर्तव्यः. तद्यथा कश्चिदन्नार्थी शालिकलापं सपलालं सतुषमाहरति नान्तरीयकत्वात्। स यावदादेयं तावदादाय तुषपलालान्युत्सृजति तथा कश्चित् मांसार्थी मत्स्यान् सकण्टकान् सशकलानाहरति नान्तरीयकत्वात्। स यावदादेयं तावदादाय शकलकण्टकान्युत्सृजति। एवमिहापि नान्तरीयकत्वात् बहुवचननिर्देशः क्रियते। अविशेषेण एकश्रुत्यं भवति।

(महाभाष्यम् भाग२, इदं सूत्रं द्रष्टव्यम्)

तेन एकस्य द्वयोः बहूनां च भवति। एकस्य यथा-पचति धातुरुदात्तः, शप्तिपावनुदात्तौ ततः शब्दकारः स्वरितः, तत पर एकोऽनुदात्तः, तस्य अनेन एकश्रुतिः। द्वयोः-आग्निवेश्य इति यञन्तत्वादादिरुदात्तः (ञ्नित्यादिर्नित्यम्) शेषनिघातः ततो द्वितीयो वर्णः उदात्तादनुदात्तस्य स्वरित इति स्वरितः तस्मात्परौ द्वानुदात्तौ अनेन एकश्रुत्यौ। बहूनाम् यथा- इमं मे गङ्गे यमुने सरस्वति इति। इदं शब्दः प्रातिपदिकस्वरेण अन्तोदात्तः। विभक्तिः अनुदात्तौ सुप्तिौ इति सुप्त्वात् अनुदात्ता। त्यदाद्यत्वे अमि पूर्वः एकादेश उदात्तः। मे इत्यनुदात्तम्। अनुदात्तं सर्वमपादादौ इति इत्यधिकारात् तस्य उदात्तादनुदात्तस्य स्वरितः। तस्मात् परेषां गङ्गे प्रभृतीनां आमन्त्रितनिघातानुदात्तानाम् एकश्रुतिः।

निषेधसूत्राणि

१. न सुब्रह्मण्यायां स्वरितस्य तूदात्तः। (१-२-३७)

इदं सूत्रं सुब्रह्मण्याख्ये निगदे यज्ञकर्मणि इति विभाषा च्छन्दसि इति च प्राप्तायाः एकश्रुतेः निषेधार्थम्। स्वरितस्य उदात्तश्चानेन विधीयते। परप्रत्यायनार्थं उच्चैरपादबन्धं यजुरात्मकं यन्मन्त्रवाक्यं पठ्यते स निगदः प्रैषा इति यावत्। नौ गदनदपठस्वन इति अप्। सुब्रह्मणि साधुः इति यत्। सुब्रह्मण्योऽ३म् इत्यत्र सुब्रण्याख्यायां ओकारः उदात्त अनेन विधीयते। *सुब्रह्मण्योम् इन्द्रागच्छ हरिव आगच्छ मेघातिथेर्मेष वृषणश्वस्य मेने गौरावस्कन्दिन्नहल्यायैजार कौशिक ब्राह्मण गौतमब्रुवाण श्वः सुत्यामागच्छ मधवन्* इति कौस्तुभकारः (पु-१८-१९) शतपथब्राह्मणे (३.३.११९) इति काशिका (भाग १.पु२८२)। अस्य सुब्रह्मण्य इत्यस्य तित्वात् स्वरिते प्राप्ते उदात्तोऽनेन विधीयते। इन्द्र आगच्छ इत्यत्र आमन्त्रिताद्युदात्तात् द्वितीयस्य वर्णस्य अनुदात्तस्य उदात्तादनुदात्तस्य स्वरित इति स्वरितत्वे अनेन उदात्तः। आगच्छ इति आकारस्य उदात्तस्य अनुदात्तस्य स्वरितत्वे अनेन उदात्त इति। एवमग्रेऽप्यूह्यम्। तत्र असावित्यन्त, अमुष्येत्यन्तः, स्यान्तस्योपोत्तमञ्च, वा नामधेयस्य इति वार्तिकैः तत्तत्स्वराः विधीयन्ते नात्रैकश्रुतिः इति बोध्यम्॥

२. देवब्रह्मणोरनुदात्तः(१-२-३८)

पूर्वसूत्रविषये एकश्रुतिबाधनेन स्वरितस्य तूदात्त इति अंशस्य अपवादोऽयम्। देवब्रह्मणोः स्वरितस्य अनुदात्तः स्यात् सुब्रह्मण्यायाम्। *देवा ब्रह्माण आगच्छत* इत्यत्र द्वयोः अपि देवब्रह्मणोः आमन्त्रिताद्युदात्तत्वे शेषनिघाते च उदात्तादनुदात्तस्य स्वरितत्वे अनेन अनुदात्तः। अत्र उद्योतकारः भाष्यप्रदीपाशयं विवृणोति-

भाष्ये तु एवं योजना- देवब्रह्मणोर्मध्ये ब्रह्मन् शब्दस्य अनेन अनुदात्तत्वम् एके वैय्यधिकरण्यवादिन इच्छन्ति। सामानाधिकरण्यपक्षे दे इत्येक एव उदात्तः। वैय्यधिकरण्यवादिनान्तु दे इति ब्रा इति च द्वयमुदात्तम्। इदमेव ध्वनयितुं द्विः पाठ उदाहरणस्य इति बोध्यम्। केचित्तु वेदार्थस्य अव्यवस्थितत्वे मानाभावादिदं चिन्त्यम्। किञ्च पक्षे विद्यमानत्वेऽपि पक्षे अविद्यमानत्वस्यापि सत्वेन ब्र इत्यस्य उदात्तस्य अग्रिमस्य अनुदात्तस्य च श्रवणाय सूत्रमावश्यकमेव। भाष्यन्तु विभाषानुवृत्तिफलकमेव। तथा च पक्षे आमन्त्रितस्वरेण आद्युदात्तस्य देवशब्दस्य ब्रह्मशब्दस्य च अन्तोदात्तेन अनुदात्तः स्वरितस्य

तु उदात्तः इति अस्य अयमपवादः। सुप् तु तत्र अनुदात्त एव। पक्षान्तरे तु पूर्वसूत्रेण अन्तेऽपि उदात्ते एकश्रुति दूरादिति एकश्रुतिः। अत एव एकश्रुति इति सूत्रे संबुद्धिपदार्थनिरूपणावसरे देवा ब्रह्माण इत्यत्र एकश्रुतिरुक्ता भाष्ये। इदञ्च सूत्रं वृत्तावेवं व्याख्यातं सुब्रह्मण्यायां देवा ब्रह्माण इति पठ्यते तत्र पूर्वेण स्वरितस्य उदात्ते प्राप्ते अनेन तस्य अनुदात्तो विधीयते इति। एकश्रुति सूत्रोदाहृतं देवा ब्रह्माण इति सुब्रह्मण्यानिगदस्थातिरिक्तत्वमेवेत्यत्र न मानमित्याहुः।

इति। (महाभाष्य भाग२, पु-३३)

३. उदात्तस्वरितपरस्य सन्नतरः (१-२-४०)

स्वरितात्संहितायामनुदात्तानाम् इति एकश्रुतौ प्राप्तायाम् उदात्तस्वरितौ परौ यस्मात् तस्य अनुदात्तस्य अनुदात्ततरः अनेन विधीयते। *इमं मे गङ्गे यमुने सरस्वति शुतुद्रि* (ऋ१०.७५.५) इत्यत्र शुतुद्रि इत्येतदामन्त्रितं पादादित्वात् अनुदात्तं सर्वमपादादौ इति उक्तत्वात् न निहन्यते। अत्र शकारोकारः षाष्ठेन, आमन्त्रितस्य च, इत्यनेन उदात्तः। तत्परत्वे सरस्वति इत्यत्र इकारस्य सन्नतरोऽनेन विधीयते।

उपसंहारः

एकश्रुतिः, एकश्रुत्यम्, प्रचयः, तान इति भिन्ननामभिः अस्य व्यवहारः। उदात्तादिस्वराणाम् अविभागेन श्रवणम् एकश्रुतिः। एकश्रुतिः वाक्यस्य संभवति। स्वरिते उदात्तानुदात्तयोः धर्मयोः समाहारे सत्यपि तयोः श्रवणे स्पष्टता वर्तते। एकश्रुतौ भेदेन अवस्थानं नास्ति इति तस्याः स्वरिताद् भेदः। उदात्तानुदात्तस्वरूपाद् भिन्नम् उदात्तानुदात्तयोः अन्तरालमेकश्रुतिस्वरूपमिति एकः पक्षः। उदात्तानुदात्तस्वरूपाभिन्नत्वे भेदानवस्थितिस्वरूपमिति अपरः पक्षः। अनेन पक्षेण सप्तस्वरपक्षः आविष्कृतः। तत्र उदात्ततरः अनुदात्ततरश्च एकश्रुतिनिष्ठोदात्तानुदात्ताभ्याम् अतिशयं प्रकाशयति। वैदिकेष्वपि यज्ञकर्मसु स्वरादिवर्जपुरस्सरम् एकश्रुत्या प्रयोगः विद्यते। यत्र एकश्रुतिः विहिता तत्र त्रैस्वर्यं विना तथा प्रयोगे धर्माधिक्यं बोध्यम्। विभाषा अच्छन्दसि इति पदच्छेदस्वीकारेण विभाषा भाषायाम् इति प्रामाण्येन च लोकेऽपि त्रैस्वर्येण प्रयोगो वर्तते इति लभ्यते। संख्यायाः उदाहरणत्वेन स्वीकारे भाषायां वैकल्पिकत्वेन स्वरयुक्तप्रयोगो वर्तते इति अनुमीयते। तत्र वैकल्पिकेन एकश्रुत्या प्रयोगे श्लेषकाव्यनिर्माणं साध्यते। स्वरितात् संहितायामिति निर्देशात् अनुदात्तस्य एकश्रुतिविधानेऽपि

पदस्य न भवति। तन्निषेधकानाम् उदात्तादिविधायकानां सूत्राणामपि प्रामाण्यात् संहितायामेव सत्वात् पदविषयिका न भवति एकश्रुतिः किन्तु वाक्यस्येति सिध्यति।

ग्रन्थसूची

१. वैय्याकरणसिद्धान्तकौमुदी (भाग ४), मोतीलाल बनारसीदास, दिल्ली, २०११.

२. शब्दकौस्तुभः (भाग२), चौखंबा संस्कृतसीरीस् आफीस्, वाराणसी, द्वितीयसंस्करणम्, १९९१.

३. काशिका पदमञ्जरी-न्यास (प्रथमो भागः), तारा बुक् एजेन्सी, वाराणसी, १९८५.

४. व्याकरणमहाभाष्यम् (भाग२), चौखंबा संस्कृत प्रतिष्ठान्, दिल्ली, १९८८.